त्रणशोहरक्तनेत्रामयाण्हत्वच। इति राजनिर्घण्टः॥ अपि च।
"रोहितो लोहितो रोही लोही दाड़िम-
पुष्पकः।
रोहीतकः प्लीहघाती रच्यो रक्तप्रसादनः॥"
इति भावप्रकाशः॥
अन्यच्च।
"रोहीतकी यकृत्प्लीहगुल्मोदरहरः स्मृतः॥"
इति राजवल्लभः॥
(गणविशेषः। यथा, महाभारते।२।२५।१६।
"महान् रोहितकांश्चैव आग्नेयान्मालवानपि।
गणान् सर्व्वान् विनिर्जित्य नीतिकृत् प्रहसन्निव।
शृङ्गकान् यवनांश्चैव विजिग्ये सूतनन्दनः॥")

रोहिता, स्त्री, (रोहित+टाप्। "वर्णादनुदात्तात्तोपधात्तो नः।" ४।१।३९। इति पाणिनीयो ङीप् नकारस्य नकारादेशश्च न।) रागादिना रक्तवर्णा। यथा,—
"रोहिणी रोहिता रक्ता लोहिनी लोहिता
च सा।"
इति जटाधरः॥

रोहिताश्वः, पुं, (रोहितः अश्वो यस्य।) अग्निः। इत्यमरः॥ हरिश्चन्द्रराजपुत्त्रः। इति मेदिनी। ते, ६३॥

रोहितिका, स्त्री, (रोहितो वर्णोऽस्त्यस्या इति। रोहित+ठन्।) रागादिना रक्तवर्णा। इति जटाधरः॥

रोहितेयः, पुं, (रोहित एव। स्वार्थे ढः।) रोहितवृक्षः। यथा,—
"प्लीहारी रोहितेयः स्यात् रक्तपुष्पश्च
रोहितः॥"
इति भरतधृतरत्नकोषः॥
(विवरणमस्य रोहितकशब्दे ज्ञातव्यम्॥)

रोही, [न्] पुं, (अवश्यं रोहतीति। रुह+आवश्यके णिनिः।) रोहितकवृक्षः। (अस्य पर्य्यायो यथा,—
"रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः॥"
इति वैद्यकरत्नमालायाम्॥
"रोहीतको रोहितकी रोही दाड़िमपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अश्वत्थवृक्षः। वटवृक्षः। इति मेदिनी। ने, १२०॥

रोहीतकः, पुं, (रोहीत एव। स्वार्थे कन्।) रोहितकवृक्षः। इति राजनिर्घण्टः॥ (यथा, बृहत्संहितायाम्।५४।९८।
"रोहितकस्य पश्चाद्धिवासंखैस्त्रिभिः करै-
र्याम्ये॥"
तथास्य पर्य्यायः।
"रोहीतको रोहितको रोही दाड़िमपुष्पकः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रौक्ष्यं, क्ली, (रूक्षस्य भावः। रूक्ष+ष्यञ्।) रूक्षता। रूक्षस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्। तथा हि।
"तैलं यद्रौक्ष्यदोषघ्नं तैलं यच्चार्द्रकं स्मृतम्।
तेन त्वां स्नापयाम्यद्य जगन्मातरमम्बिकाम्॥"
इति दुर्गापूजायां महाष्टमीमहानवम्योर्महास्नानप्रकरणे देवीपुराणम्॥ (तथा च।
"ये रसा वातशमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम्॥"
इति सुश्रुते सूत्रस्थाने ४० अध्यायः॥)

रौच्यः, पुं, (रुचेरपत्यमिति। रुचि+ष्यञ्।) मनुविशेषः। यथा,—
"रौच्यादयस्तथान्येऽपि मनवः संप्रकीर्त्तिताः।
रुचेः प्रजापतेः पुत्त्रो रौच्यो नाम भविष्यति॥"
इति मात्स्ये ९ अध्यायः॥
तन्मन्वन्तरे देवादयो यथा,—
"नवोदशस्य पर्य्याये ये रौच्यस्य मनोः सुराः।
सप्तर्षींश्च नृपांश्चैव वदतो मे निशामय॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुशर्म्माणस्तथा ह्येते समस्ता मुनिसत्तम॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यत्यथ सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः॥
चित्रसेनो विचित्रश्च नयकृत्निर्भयो दृढः।
सुनेत्रः क्षत्त्रबुद्धिश्च सुव्रतश्चैव तत्सुताः॥"
इति मार्कण्डेयपुराणम्॥
अन्यद्विवरणं रुचिशब्दे द्रष्टव्यम्॥ * ॥ बिल्वकाण्डवृक्षः। तत्पर्य्यायः। बैल्वः २। इति हेमचन्द्रः॥ (क्ली, रौच्यस्येदमिति। अण्। मन्वन्तरविशेषः। यथा, मार्कण्डेये। १००। ३६।
"ख्यातिरेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
निशातयत्यखिलं रौच्यं श्रुत्वा नरोत्तमः॥")

रौट, ऋ नादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) चतुर्द्दशस्वरी। ऋ, अरुरौटत्। नादरोऽनादरः। रौटति खलं लोकः। इति दुर्गादासः॥

रौड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अरुरौड़त्। इति दुर्गादासः॥

रौद्रं, क्ली, (रुद्रस्येदम्। रुद्र+अण्।) शृङ्गाराद्यष्टरसान्तर्गतषष्ठरसः। तत्पर्य्यायः। उग्रम् २। इत्यमरः॥ रे क्रोधस्थायिरे। रुद्रो देवता यस्य रौद्रम्। यदाह भरतः।
"शृङ्गारो विष्णुदेवः स्याद्धासः प्रमथदैवतः।
करुणो यमदेवः स्याद्रौद्रो रुद्राधिदैवतः॥" इति
रे क्रोधस्थायिरे। उग्यति क्रुधा समवैति उग्रः। उचिर्य समवायने नाम्नीति रक् निपातनाच्च गः। सर्व्वाभिभाविता रौद्रः। यथा, रावणचरितादि। एष वीभत्सरौद्रे क्लीवे रूपभेदात् अन्ये पुंसि वीभत्सरौद्रौ चेति पुंलिङ्गपाठ इह युक्तः। इति भरतः॥ * ॥ अपि च।
अथ रौद्रः।
"रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनं रिपुस्तत्र तच्चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव।
संग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढ़ा॥
भ्रूविभङ्गौष्ठनिर्द्दंशबाहुस्फोटनतर्ज्जनाः।
आत्मावदानकथनमायुधोत्क्षेपणानि च।
अनुभावास्तथा क्षेपक्रूरसन्दर्शनादयः॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः।
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः॥"
यथा,—
"कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्म्मर्य्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्॥"
अस्य युद्धवीराद्भेदमाह।
"रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः॥"
इति साहित्यदर्पणे ३ परिच्छेदः॥

रौद्रः, पुं, (रुद्रस्यायमिति। रुद्र+अण्।) सूर्य्यतेजः। तत्पर्य्यायः। घर्म्मः २। इति मेदिनी। रे, ८०॥ प्रकाशः ३ द्योतः ४ आतपः ५। इत्यमरः॥ तस्य गुणाः।
"आतपः कटुको रूक्षः स्वेदमूर्च्छातृषावहः।
दाहवैवर्ण्यजननो नेत्ररोगप्रकोपनः॥"
इति राजवल्लभः॥ * ॥
सप्तरौद्रा यथा,—
"जठरः पिङ्गलो रौद्रो घोराख्यः कालसंज्ञितः।
अग्निनामा हतो रौद्रः सप्त रौद्राः प्रकी-
र्त्तिताः॥"
ग्रन्थान्तरे सप्तमो रौद्रः प्राणहारः॥ तेषां फलानि यथा,—
"पिङ्गलो रौद्रनामा च कालरूपः प्रवाणयम्।
खर्परे वहुरोगः स्यात् सर्व्वजीवसमुद्भवः॥
जठरो रौद्रनामा च घोरधूम्रश्च कारयेत्।
व्रणादिपित्तरोगांश्च नानाकष्टकरो नृणाम्॥
अग्निनाम्ना यदा वर्षे रौद्रो भवति नान्यथा।
उत्तापेन क्षितिं शुष्येत् नराणां रोगदो भवेत्।
रौद्रनामा महारौद्रो यत्राब्दे च भवेद्ध्रुवम्।
चित्तोद्वेगं व्रणं कुर्य्यान्नानारोगसमन्वितम्॥
घोरनामा महारौद्रो घोरधूम्रश्च कारयेत्।
उत्तापेन सदा दग्धं नानारोगसमन्वितम्॥
कालनामा महारौद्र उत्तापं पीड़नं सदा।
नानारोगसमायुक्तं व्रणादिकष्टकं भवेत्॥"
इति ज्योतिषम्॥
रसविशेषः। इति मेदिनी। रे, ८०॥ तद्विवरणं वीभत्सरौद्रशब्दे द्रष्टव्यम्। हेमन्त ऋतुः। इति हेमचन्द्रः॥ यमः। इति धरणिः॥ (कार्त्तिकेयः। यथा, महाभारते। १। १३८। १३।
"आग्नेयः कृत्तिकापुत्त्रो रौद्रो गाङ्गेय इत्यपि।
श्रूयते भगवान् देवः सर्व्वदेवमयो गुहः॥")

रौद्रः, त्रि, (रुद्र+अण्।) तीव्रः। (यथा, रुचिनिश्चयव्याख्याने विजयरक्षितेन हरिवंशोक्तज्वरवर्णनवचनमुक्तम्।
"ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥")